ISSN-2990-7675 (Print) ISSN-2990-7683 (Online)

# संस्कृतकाव्यप्रणयनपरम्परायां मङ्गलाचरणस्य महत्त्वम्

गुरुप्रसादकोइराला, विद्यावारिधिः
सहप्राध्यापकः - साहित्यम्
ने. सं. वि. : पिण्डेश्वरविद्यापीठम्, धरान-नेपालः
koiralaguru38@gmail.com
DOI: https://doi.org/10.3126/ss.v2i2.69306

## लेखसारः

*लोके यस्य कस्यापि सत्कार्यस्य शुभारम्भे निर्विघ्नपरिसमाप्त्यर्थं मङ्गलविधिः क्रियते । गृहनिर्माणे शिलान्यासः, उपनयनविवाहादिकार्ये कुलदेवादीनां पूजनम्, यात्रारम्भे स्तोत्रवाचनम्, कार्यक्रमप्रारम्भे स्वस्तिवाचनम् इत्यादिकं मङ्गलाचरणमेव मन्यते । एतेषां कार्याणां निर्विघ्नतया कार्यसाफल्यं मङ्गलस्य प्रयोजनं भवति । पौरस्त्यकाव्यशास्त्रपरम्परा एव ऋषिमुनिभिः प्रारब्धा ज्ञायते । ते इष्टदेवान् विस्मृत्य किमपि कार्यारम्भं न कुर्वन्ति स्म । ते काव्यशास्त्रादिप्रणयनमपि सत्कार्यमेवेति विचार्य काव्यस्य शास्त्रस्य चारम्भे इष्टदेवस्य प्रार्थनां कुर्वन्ति स्म । इयं परम्परा अद्यावधि प्रचलिता विद्यते । ग्रन्थारम्भे कृतेन भगवत्स्मरणेन काव्यकर्तुर्मनसि दृढविश्वासो जायते यत् भगवतः प्रासादात् कार्यमिदं निश्चप्रचं समाप्यते । इत्यनेन ग्रन्थकर्तुः कृतिरचनायां विलक्षणोत्साहः आविष्क्रियते । निर्विघ्नपरिसमाप्तौ कवेरुत्साह एव प्रथमा सामग्री भवति । पौरस्त्यवाङ्मये रचिता ग्रन्थाः प्रायशो मङ्गलाचरणबद्धा विद्यन्ते । ग्रन्थादौ मङ्लपद्यरचनापरम्परा अद्यावधि प्रचलिता दृश्यते । मङ्गलाचरणमपि रसालङ्कारैः सुसंस्कृतं कमनीयसौन्दर्यजनकं भवति । मङ्गलपद्याद् देवादिविषयकं रतिभावमास्वाद्य पाठका अपि कृतकृत्या जायन्ते । मङ्लाचरणस्य गुरुत्वं विचार्यैव औपचारिकपरीक्षास्वपि मङ्लाचरणपद्यानि प्रश्नत्वेन पृच्छयन्ते । एतादृशस्य महत्त्वाधायकस्य मङ्लाचरणस्य दृश्यमदृश्यञ्च महत्त्वं विषयीकृत्य निष्कर्षनिस्सारणार्थं लेखेऽस्मिन् पुस्तकालयस्थितान् प्राथमिकद्वितीयकस्रोतस्सामग्रीरधीत्य विश्लेषणतथ्यापनादिविधीन्नवलम्ब्य निष्कर्षनिस्सारणं करिष्यते ।*

***शब्दकुञ्जी*** *: आध्यात्मिकम्, निर्विघ्नसमाप्तिः, पौरस्त्यम्, भौतिकम्, मङ्गलाचरणम् ।*

## विषयपरिचयः

मानवः प्रयोजनमूलकेषु कार्येषु संलग्नो भवति । एष किमपि कार्यं प्रारभ्य तस्य समाप्तिमेवाद्वितीयमुद्देश्यं निर्धारयति । स प्राच्यसंस्कारसम्बद्धश्चेत् प्रथमतः स्वकीयमिष्टदेवं संलक्ष्य मङ्गलमाचरति । इष्टदेव एव

मङ्गलमूर्तिरस्ति । इयमवस्था कार्यसाफल्यं कामयमानानां सर्वेषां जनानां सर्वेषु कार्येषु भवति । यथा गृहारम्भः विवाहः, यात्रा, उद्यमारम्भप्रभृतीनि कार्याणि भवन्ति । परमत्र ग्रन्थनिर्माणमुद्दिश्य क्रियमाणस्य मङ्गलपाठस्य सन्दर्भः समुत्थापितोऽस्ति । पौरस्त्यवाङ्मयस्य कृतिनिर्माणेतिहासे प्राचीनकालादेव मङ्गलाचरणपरम्परा विद्यते । मान्यजनानामाशीर्वादेन प्रारब्धानि कार्याणि सिद्ध्यन्तीति विश्वासोऽस्माकं पौरस्त्याध्यात्मिकपरम्परायां विद्यते । तस्मात् कस्यापि कार्यस्यारम्भे मान्यजनानामाशीर्वादोऽपेक्ष्यते । एवमेव ग्रन्थनिर्माणमपि बौद्धिककार्यमस्ति । अत्रापि मान्यजनानामाशीर्वादोऽपेक्ष्यते । ग्रन्थकाराणां मान्या गुरुमुनिदेवादयो भवन्ति । अतः तेषां कृपया ग्रन्थो निर्विघ्नं परिसमाप्यते इति दृढविश्वासोऽस्ति । तस्मात् ग्रन्थारम्भे ग्रन्थमध्ये ग्रन्थान्ते वा गुरुमुनिदेवप्रभृतीनां गुणगौरवान्वितं मङ्गलपद्यं विरच्यते । अस्य प्रयोजनं प्रामुख्येन विघ्ननिवारणमेव परमत्र अन्यदपि वैशिष्ट्यं विलोक्यते । अतो मङ्लाचरणस्य महत्त्वप्रकाशनं मुख्योद्देश्यं निर्धार्य लेखोऽयं निर्मितः ।

## समस्या

शैक्षिकक्षेत्रे समुद्भूता समस्या एव शोधकार्यस्याधारभूमिरस्ति । समस्यां समाधातुं शोधकार्यं क्रियते । अस्य शोधाध्ययनस्यापि समस्या विद्यते । सा समस्या विन्दुवाक्यैरधः प्रस्तूयते-

पौरस्त्यग्रन्थरचनायां मङ्गलाचरणपरम्परा कीदृशी ?

पौरस्त्यकाव्यशास्त्रे मङ्गलाचरणस्य महत्त्वं कीदृशम् ?

## उद्देश्यम्

समस्याशीर्षके या समस्या उल्लिखिता विद्यते, तस्य समाधानमेवास्याध्ययनस्योद्देश्यं भवति । तदत्र विन्दुवाक्यैरधः प्रस्तूयते-

पौरस्त्यवाङ्मयसम्बद्धस्य मङ्गलाचरणस्य परम्पराप्रकाशनम् ।

पौरस्त्यग्रन्थेषु मङ्लाचरणस्य महत्त्वप्रकाशनम् ।

## शोधविधिः

अस्याध्ययनस्योद्देश्यं सम्यक्तया परिपूरणाय सामग्रीसङ्कलनार्थं पुस्तकालयमुपयुज्य सामग्रीसङ्कलनं विधाय प्राप्तसामग्रीरधीत्य तथ्यनिस्सारणार्थं वर्णनात्मकविश्लेषणात्मकप्रभृतीनां विधीनां यथावसरमुपयोगो विहितोऽस्ति ।

## पूर्वाध्ययनम्

पौरस्त्यकाव्यशास्त्रेतिहासे प्राचीनकालादेव मङ्गलाचरणस्य परम्परा प्रचलिता प्राप्यते । काव्यशास्त्रीयग्रन्थेषु मङ्गलाचरणस्य विषये सामान्यतया आवश्यकतादिकं विश्लेषितं विद्यते । मङ्गलाचरणविषये सञ्जाताः सङ्केतादयोऽत्र उल्लिख्यन्ते ।

राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठतः प्रकाशितः लघुशब्देन्दुशेखरस्य आदितो बाह्यप्रयत्नविवरणान्तं संज्ञाप्रकरणमिति पाठे समुल्लिखतं विद्यते यत्- कस्यचिच्छुभकार्यस्य करणात् प्राक् किमपि मङ्गलसूचकं यत् कार्यं क्रियते, आचर्यते वा तदेव मङ्गलाचरणमुच्यते । तच्च कदाचित् पूजनादिरूपं भवति । कदाचिच्च ऋषिदेवादिनमस्काररूपम् । यथा उपनयनविवाहादौ कुलदेवतादीनां पूजनं मङ्गलाचरणं कथ्यते । प्रस्थानसमये देवान् ज्येष्ठान् वा नमन्ति तदपि मङ्गलाचरणं भवति । यथा लोके मङ्गलाचरणं भवति तद्वदेव शास्त्रप्रणयनमपि परमं शुभं कर्म । अतोऽत्रापि मङ्गलमाचरन्ति विद्वांसः । ते ग्रन्थादौ ऋषिदेवादिनमस्कारसूचकादिकं वाक्यं लिखन्ति । तदेव ग्रन्थे मङ्गलाचरणं भवति । (शर्मा, २०१५ : ८)

नेपालराजकीयप्रज्ञाप्रतिष्ठानतः प्रकाशिते 'नेपालीसाहित्यकोशः' इति कोशग्रन्थे मङ्गलाचरणस्य विषये समुल्लिखितमस्ति यत्- कस्मिन्नपि धर्मानुष्ठानादिशुभकार्यस्य प्रारम्भे देवादिस्तुतिः क्रियते । सा स्तुतिरेव मङ्गलाचरणं भवति । साहित्यजगति विशेषतः श्रव्यकाव्यस्य प्रारम्भे प्रस्तावनात्वेन संस्थापितं पद्यं वा पद्यसमूह एव मङ्गलाचरणमिति संस्कृतकाव्यपरम्परायां प्राप्यते । दृश्यकाव्येऽपि सूत्रधारस्य प्रवेशात् प्राक् नान्दीति नाम्ना मङ्गलाचरणं क्रियते । अस्य प्रचलनं नैपालकानां लेखनाथपौड्यालशम्भुप्रसादढुङ्ग्यालप्रभृतीनां कवीनां कृतिषु प्रारम्भे 'श्रीगणेशाय नमः' 'गौरीशङ्कराभ्यां नमः' इत्यादिनमस्कारात्मकं वाक्यं मङ्गलाचरणरूपेण समुल्लिखितं लभ्यते । (बरालः, २०५५ : ५७४)

आचार्यलोकमणिदाहालः साहित्यदर्पणस्य मञ्जुव्याख्यायां मङ्गलाचरणस्य विषये समुल्लिखति यत्- प्रारीप्सितस्य निर्विघ्नपरिसमाप्तिकामो मङ्गलमाचरेदिति शिष्टाचारः । तच्चेष्टदेवतानमस्काररूपं शिष्टेषु प्रसिद्धम् । तस्माच्च वाग्देवतानमस्काररूपं चिकीर्षितग्रन्थस्य काव्यलक्षणग्रन्थत्वेन ताद्रूप्यात् । न च किरणावल्यादौ तदभावेऽपि समाप्तिदर्शनात्कादम्बर्यादौ तद्बाहुल्यादपि समाप्त्यदर्शनान्मङ्गलाचारस्य ग्रन्थपरिसमाप्तौ न हेतुत्वमिति वाच्यम् आद्ये संस्काररूपस्य तस्य सत्वादन्त्ये तदपेक्षया विघ्नस्य बाहुल्यात्सामान्यतो मङ्गलाचारयुक्तस्यैव निर्विघ्नपरिसमाप्तिदर्शनाच्च । (दाहालः, १९९५ : १)

संस्कृतकाव्यशास्त्रस्य विश्लेषको विश्वेश्वरो ध्वन्यालोकस्य व्याख्यावसरे प्रसङ्गप्राप्तस्य मङ्गलाचरणस्य विषये स्पष्टां धारणां पुरस्करोति यत्- सर्वेषां शुभकार्याणां भगवतः स्मरणं क्रियते । तेन कार्यव्यापारे सम्भावितानां विघ्नानां विजये शक्तिः समायाति । तस्माद् ग्रन्थारम्भेऽपि निर्विघ्नपरिसमाप्त्यर्थं भगवतः स्मरणस्य परिपाटी सदाचाररूपेण परम्परातः समागता विद्यते । यद्यपि भगवतः स्मरणं मानसिको व्यापारः तथापि ग्रन्थकारो येन रूपेण

भगवतः स्मरणं करोति तस्य शिष्यानां शिक्षणाय ग्रन्थस्य प्रारम्भे स्थापनां करोति । एतादृशी परम्परा पौरस्त्यवाङ्मयस्य शिष्टाचारपरिपाट्याः आदर्शो मन्यते । तस्मात् संस्कृतग्रन्थेषु प्रायः सर्वत्र मङ्गलाचरणं प्राप्यते। (विश्वेश्वरः १९९८ : १)

संस्कृतसमालोचकः स्थानेशचन्द्रउप्रेतीमहोदय ध्वन्यालोक एक अध्ययन इति ग्रन्थे केवलं ग्रन्थकारस्यैव नापितु व्याख्याकारस्य श्रोतृजनस्य च कृते आशीर्वादमयैर्वचनैर्मङ्गलाचरणं क्रियते इत्युल्लिखति । (उप्रेती, १९०७ : १२२)

पौरस्त्यवाङ्मये प्राचीनकालादेव मङ्गलाचरणस्य परम्परा प्राप्यते । न्यायग्रन्थेषु पूर्वपक्षाणां मतनिरसनपूर्वकं मङ्गलस्य प्रयोजनमुपस्थापितं विद्यते । मूलग्रन्थानां व्याख्यातृभिः प्रायशः सर्वेषु ग्रन्थेषु मङ्गलाचरणमुद्दिश्य किञ्चिदुल्लिखितं विद्यते, तथापि छात्राणां कृते सुबोध्यतया पठनसामग्रीरूपेण एकत्र नैव लभ्यते । सर्वत्र आध्यात्मिकी उपलब्धिरेव प्राप्यते परं मङ्गलकार्यस्य भौतिकं महत्त्वमपि दृश्यते । लेखेऽस्मिन्नेतान् सर्वान्नावश्यकान् विषयान् विमृश्योपलब्धि: समाविष्टो विद्यते।

## विषयविश्लेषणम्

### मङ्गलाचरणशब्दविवृतिः

मङ्गति=हितार्थं सर्पति, मङ्गति= दूरदृष्टमनेनास्माद्वेति व्युत्पत्तौ मगि + मङ्गतेरलच् इति मङ्गलम् । अस्याशयः अभिप्रेतार्थसिद्धिर्भवति । (शब्दकल्पद्रुमः) यस्मात् हितं = कल्याणमयम् अर्थः = प्रयोजनम् सर्पति = समागच्छति । अथवा यस्मात् दूरदृष्टं = अप्राप्यम्, परं ज्ञातं लभ्यते इत्यर्थे मग् (मङ्ग) गत्यर्थकधातो अलच् इति उणादिप्रत्ययस्य योगेन मङ्गलमिति शब्दो निष्पद्यते। अस्य सारार्थो भवति अभिप्रेतार्थसिद्धिः ।

'षड्खण्डागम' इति जैनग्रन्थस्य धवलाटीकायां वीरसेनस्वामिना मङ्गलशब्दस्य विवृतिः कृता विद्यते यत्

मंगशब्दोऽयमुदिष्टः पुण्यार्थस्याभिधायक।
तल्लातीत्युच्यते सद्भिर्मगलं मंगलार्थिभिः ॥
पापं मलमिति प्रोक्तमुपचार समाश्रित:।
तद्धि गालयतीत्युक्तं मंगलं पण्डितै जनै: ॥

'मङ्ग' शब्दः पुण्यार्थवाचकोऽस्ति। मङ्गं लातीति इत्यर्थे मङ्गालार्थिभिर्मङ्गलमिति शब्दः प्रयुज्यते। एवमेव मं मलमुपचारेण पापं कालुष्यं गालयतीति, मं पापं गलति येन असौ मङ्गलमिति व्युत्पत्तौ यत् पापं तज्जन्यमनिष्टादिकञ्च दूरीकरोति तद् मङ्गलमित्यर्थश्च भवति । 'एकादशीतत्त्वम्' इति ग्रन्थे मङ्गलशब्दस्यार्थविवृतिर्विद्यते, यत्-

प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम्।
एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥

तत्त्वदर्शिभिर्मुनिभिः सर्वदा अप्रशस्तं (गर्हितम्) विवर्ज्य प्रशस्ताचरणमेव (प्रशंसनीयमाचरणमेव) मङ्गलं कथितम्।

शब्देऽस्मिन् आचरणमिति संयुज्य मङ्गलाचरणं निष्पद्यते। आङ् उपसर्गान्वितस्य चरधातो ल्युट् प्रत्ययेन आचरणम् इति शब्दो निर्मीयते। अनेन सह मङ्गलस्य आचरणमिति षष्ठीतत्पुरुषसमासप्रक्रियया मङ्गलाचरणमिति पूर्णः शब्दः सञ्जायते। अस्य सामान्यार्थो मङ्गलकरणमिति भवति। विशिष्टार्थस्तु कस्यापि सुकार्यारम्भे मङ्गलपाठादिकं कार्यमिति निस्सरति। अस्माकं परम्परायां मङ्गलदायका गुरुमुनिदेवप्रभृतयो मान्यजना भवन्ति। अतस्तेषां गुणगौरवगानमेव मङ्गलाचरणशब्दस्य व्यवहारिकोऽर्थः प्रचलन्नस्ति।

## मङ्गलाचरणस्वरूपम्

सामान्यतया शब्दनिर्वचनेनैव मङ्गलाचरणशब्दस्य स्वरूपं व्याकृतम्। तत्र सम्भावितानां विघ्नानामुपशान्तये मङ्गलाचरणमित्यर्थप्रतीतिः सञ्जाताः। पूजनीया मान्यजना मङ्गलप्रदायका भवन्ति। तेषामाशीर्वादेन कार्यं सफलं जायते इति आध्यात्मिको विश्वासो विद्यते। अस्माकं पूजनीया मान्यजना माता, पिता, गुरु, मुनि, ईष्टदेवप्रभृतयो भवन्ति। तेषां नामगुणादिकं संस्मर्य किमपि कार्यारभ्भः क्रियते। तदेव मङ्गलाचरणमिति पारम्परिकदृष्टान्तैरपि मङ्गलाचरणस्वरूपं निर्धारयितुं शक्यते। मङ्गलाचरणलक्षणमिति नाम्ना तु नैव तथापि मङ्गलाचरणमुद्दिश्य विद्वांसः स्वकीयग्रन्थेषु स्वरूपमहत्त्वादिविषयमुल्लिखन्ति। व्याकरणशास्त्रस्य भाष्यकर्ता पतञ्जलिर्महाभाष्ये समुल्लिखिति यत् -

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाण्यध्येतारश्च बुद्धियुक्ता यथा स्युरिति। (पतञ्जलिः, १९९८ : २२३)

माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते। वीरपुरुषाणि च भवन्ति। आयुष्मत् पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति। (पतञ्जलि पूर्ववत्) शास्त्रस्य आदौ मध्ये अन्त्ये च मङ्गलं क्रियते। एतेन शास्त्रस्य निर्विघ्नपरिसमाप्त्यनन्तरं प्रसिद्धिर्जायते। एतेन मङ्गलकर्तारः सामर्थ्ययुता भवन्ति। कर्तारोऽध्येतारश्च सिद्धार्था भवन्तीति। महाकाव्ये मङ्गलाचरणमत्यावश्यकमिति विमृश्य काव्यलक्षणकारैर्महाकाव्यलक्षणेऽपि मङ्गलाचरणं कर्तव्यमिति समुल्लिखितमस्ति। तत्र केवलं मङ्गलाचरणस्यावश्यकतां प्रदर्श्य महाकाव्यस्यारम्भे नमस्कारात्मकम् आशीर्वादात्मकम् वस्तुनिर्देशात्मकं वा मङ्गलाचरणं कर्तव्यमिति निर्दिश्यते यत्-

आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। (विश्वनाथः, १९९५ : ७१९)

एवमेव दृश्यकाव्येऽपि पूर्वरङ्गस्याङ्गेषु विघ्नविघाताय नान्दी नाम्ना मङ्गलाचरणमत्यावश्यकं भवतीति नान्दीस्वरूपमुल्लिखितं विद्यते। तत्र विघ्नोपशान्तये देवद्विजनृपादीनामाशीर्वचनसंयुक्ता स्तुतिः क्रियते यत्-

तथाऽप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये।
आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ (विश्वनाथः,१९९५ : ४७८)

सारतया मङ्गलाचरणं विघ्नविघाताय क्रियते । तत्र मातापितागुरुमुनिदेवादिमान्यजनानां प्रशस्तिवर्णनं क्रियते। मङ्गलाचरणस्य स्वरूपत्रयं भवति। नमस्कारात्मकम्, आशीर्वादात्मकम्, वस्तुनिर्देशात्मकञ्चेति।

## मङ्गलाचरणस्य महत्त्वम्

मङ्गलाचरणस्य महत्त्वविषये पौरस्त्यकाव्यशास्त्रिभिः स्वकीये ग्रन्थारम्भे समुल्लिखितं विद्यते । एते लक्षणशास्त्रस्यापि प्रारम्भे मङ्गलाचरणं कुर्वन्ति । तत्र प्राक् तस्य प्रयोजनं समुल्लिख्यते । काव्यप्रकाशकारो मङ्गलाचरणपद्यस्य प्राक् "ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशती"त्युल्लिख्य विघ्नविघातमेव मङ्गलाचरणस्य महत्त्वमुल्लिखति। एवमेव साहित्यदर्पणेऽपि मङ्गलाचरणपद्यस्य प्राक् "ग्रन्थारम्भे निर्वघ्नेन प्रारीप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः साम्मुख्यमाधत्ते" इत्युल्लिख्य इप्सितकार्यस्य निर्विघ्नतया परिसमाप्तेः कामना एव मङ्गलाचरणस्य महत्त्वमुपस्करोति।

## विप्रतिपत्तयः

मङ्गलाचरणस्य विषयेऽनीश्वरवादीनां विमतिर्भवितुं शक्नोतीति प्रकल्प्य न्यायसिद्धान्तमुक्तावल्यां तेषां पूर्वपक्षिणां जिज्ञासासमाधानं क्रियते। यथा-

ननु मङ्गलं न विघ्नविध्वंसप्रति न वा समाप्तिं प्रति कारणम् विनाऽपि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति (पञ्चानान, १९७८, पृ. ८)

पौरस्त्यवाङ्मये कारणावलीप्रभृतयो कृतयो विद्यन्ते तत्र मङ्गलाचरणं विनैव पूर्णतां गता दृश्यन्ते। एवमेव कादम्बरीप्रभृतिषु कृतिषु नैकैन पद्येन मङ्गलाचरणं कृतं विद्यते तथापि तादृशा ग्रन्था अपूर्णा एव दृश्यन्ते। इति निदर्शनमुद्धृत्य पूर्वपक्षिणो मङ्गलाचरणं महत्त्वहीनं प्रवदन्ति। अस्याक्षेपस्य निराशाय तत्रैव प्रत्युत्तरं विद्यते यत्-

यत्र च मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते। यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचूर्यं वा बोध्यम्। (पञ्चानन, १९७८, पृ. १०)

अस्माकमाध्यात्मिकी धारणा पुनर्जन्मसम्बद्धा विद्यते । इहजन्मनि कृतं पुण्यमपुण्यं वा पुनर्जन्मनि फलप्रदायकं भवतीति दृढविश्वासो विद्यते । तस्माद् मङ्गलाचरणं विनाऽपि ये ग्रन्थाः पूर्णा जाताः प्राप्यन्ते, तत्र पूर्वजन्मनः पुण्यं कारणत्वेन कार्यं करोति। एवमेव यत्र बाहुल्येन मङ्गलाचरणानि सन्त्यपि ग्रन्थसमाप्तिर्न दृश्यते तत्र पूर्वजन्मनो बलवत्तरो विघ्नो स्वसामर्थ्यं प्रकटयतीति बोध्यम्।

पौरस्त्यग्रन्थेषु प्रायः आध्यात्मिकदृष्ट्या मङ्गलाचरणस्य महत्त्वं दरीदृश्यते परमत्र भौतिकं महत्त्वमपि विद्यते। ग्रन्थारम्भे गुरुमुनिदेवादीनां नामस्मरणपूर्वकं स्तुत्यादिकं क्रियते तेन ग्रन्थकर्तुर्मनसि विश्वासो विद्यते यत् मम कार्यं प्रति

मान्यजना सम्बद्धा विद्यन्ते, अतो मया सावधानेन भाव्यम् । अन्यथा ते मां गर्हयन्तीति मनसि विचार्य सावधानेन कार्यसम्पादने संलग्नो भवति । एतादृशी मानसिकी प्रेरणाऽपि ग्रन्थसमाप्तौ सहाय्यं भवति । एवमेव निर्मितस्य ग्रन्थस्य पाठका अपि प्रारम्भे गुरुमुनिदेवादीनां स्तोत्रमयं मङ्गलाचरणं सम्पठ्य सावधाना भवन्ति तस्मात् ते एकाग्रतया ग्रन्थस्य सारतत्त्वज्ञाने सफला भवन्ति । तस्मात् ग्रन्थप्रणेतुः पाठकानां कृते च मङ्गलाचरणानुसरणमावश्यकं दरीदृश्यते ।

**मङ्गलाचरणप्रकाराः**

मङ्गलाचरणस्य प्रकारविषये लक्षणशास्त्रेषु समुल्लिखितं विद्यते । काव्यशास्त्रे प्रसिद्धा मङ्गलाचरणप्रकारास्त्रयः सन्ति । एतेषां स्वरूपादिकं न्यायसिद्धान्तमुक्तावल्या बालप्रियाख्यां टीकायां समुल्लिखितं विद्यते यत्-

आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम् ।

ग्रन्थारम्भे आशीर्वादात्मकम्, नमस्क्रियात्मकम्, वस्तुनिर्देशात्मकञ्च मङ्गलाचरणं क्रियते ।

***आशीर्वादात्मकम्***

परमेश्वरात् स्वस्य स्वशिष्यस्य वा वाञ्छितार्थप्रार्थनम् । (पञ्चानन १७८ : ७८) मङ्गलाचरणस्य आशीर्वादात्मके प्रथमे प्रकारे परमेश्वरात् ग्रन्थकर्तुर्वा शिष्यस्य (पाठकस्य) कृते मनोवाञ्छितार्थस्य प्रार्थना क्रियते । अत्र परमेश्वारात् आशीर्वादस्य याचना अभिव्यज्यते । संस्कृतसाहित्ये आशीर्वादात्मकमङ्गलाचरणस्योदाहरणानि बहूनि विद्यन्ते । अत्र कतिचित् दिशानिर्देशरूपेण उल्लिख्यते । अभिज्ञानशाकुन्तलाख्ये नाटके यथा-

या सृष्टिः स्रष्टुरद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्त श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभि प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥

'सूर्यो जलं मही बह्निर्वायुराकाशमेव च । दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः स्मृताः' इति विष्णुपुराणानुसारं शङ्करस्य भौतिक्य तनवोऽष्टौ विद्यन्ते । इति पौराणिकप्रमाणमधिकृत्यात्र कविना प्रत्यक्षाभिर्नेत्रैर्दृश्यमानाभि तनुभिरीशः शङ्करो वोऽवतु । इति आशीर्वादवचनं मङ्गलाचरणरूपेण समुल्लिखितं विद्यते । तत्र कीदृशाभिस्तनुभिः ? इति जिज्ञासा समनाय समागतानि सर्वाणि विशेषणानि हरमूर्तेर्विद्यन्ते । तद्यथा-

१. या मूर्तिर्ब्रह्मणः प्रथमा सृष्टिर्विद्यते सा जलरूपा, २. या शास्त्रोक्तविधिहुतं हव्यं देवान् प्रापयति सा बह्निरूपा, ३. या हवनकर्त्री यजमानरूपा, ४- ५. ये समयविभागं कुरुतः ते द्वे सूर्यचन्द्ररूपे मूर्ती, ६. या श्रवणेन्द्रियविषयभूता जगद्व्याप्यविद्यमाना आकाशमयी मूर्तिः, ७. या सकलधान्यादिबीजानां प्रकृतिः इति बुधा

वदन्ति पृथ्वीमयी मूर्तिः, ८. या शरीरिणः प्राणवन्तो भवन्तीति वायुमयी मूर्तिः, एताभिः प्रत्यक्षाभिर्जलाग्निसूर्यचन्द्राकाशधरणीपवनाख्याभिरष्टाभिः तनुभिरित्यर्थः।

अत्र भौतिके जगति प्रत्यक्षरूपेण दृश्यमाना भगवतः शिवस्याष्टौ मूर्तयः समुल्लिखिता विद्यन्ते। तादृशाः परोपकारमयाः शिवांशभूतास्तनवः नाटककर्तारम् पाठकान् च सर्वान्नपि रक्षन्तु इति प्रार्थना प्रतीयते । अत इदमाशीर्वादात्मकं मङ्गलाचरणमस्ति।

एवमेवात्र नाट्यवस्तुनिर्देशनमपि विद्यते । या सृष्टिः स्रष्टुराद्या सृष्टि इत्यनेन एतावत्कालपर्यन्तं तादृशसृष्टेरजातत्वात् शकुन्तला सूचिता। या विधिना सुरतविधिना हुतं निषिक्तं हवी बीजं वहतीति तस्या गर्भः सूच्यते। होत्रीत्यनेन कण्वः । ये द्वे कालं विधत्तः इत्यनेनानसूयाप्रियंवदे सख्यौ कालं शापान्तसमयं विधत्तो बोधयतः । श्रुतिपरम्परया पतिव्रत्यादिभिर्गुणैर्विश्वं व्याप्य स्थिता प्रसिद्धा । सर्वेषां बीजं मूतभूतश्चक्रवर्तित्वाद्भरतः । तस्य प्रकृतिरुत्पत्तिरिति भरतोत्पत्तिः । यया प्राणिनः प्राणवन्त इत्यनेन भरतशकुन्तलया सह स्वपुरागमनम् । अष्टाभिः प्रकृत्यादिभिः प्रत्यक्षाभिः प्रपन्न इत्यनेन निर्वहणसन्धिसमाप्तौ नटाशंसा प्रवर्ततां प्रकृतिहिताय पार्थिवः इत्यादिकं नाट्यवस्तु सूचितम्। अतः प्रकारान्तरेण मङ्गलाचरणमिदं वस्तुनिर्देशात्मकमपि मन्यते।

**ध्वन्यालोकः** स्वेच्छाकेशरिणः स्वच्छस्वच्छायायासितेन्दवः।

त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥ (आनन्दवर्धनः, २००६ : १)

मधुर्नाम दैत्यः, तस्य रिपुः - मधुरिपुः- विष्णुः, स्वेच्छया स्वातन्त्र्येण केशरी सिंहो भवति। नरस्तु परेच्छया ईश्वरेच्छया स्वकर्मपारतन्त्र्यादेव बलादिव पशुरूपतामधिगच्छति । मनुष्ययोनावतिदण्डतया पशुतामृच्छति । तद्विपरीतमीश्वरः पशुभावेनापि स्वकीयमैश्वर्यमेव प्रकटयति। नृसिंहो हिरण्यकशिपुं नखैरुरोविदारणं कृत्वा भक्तश्रेष्ठं प्रह्लादं रक्षितवान्। भगवतो नृसिंहस्य नखाः एकतस्तु चन्द्रादप्यधिकं निर्मलकान्तकोमलाः, अपरतश्च शस्त्राणीव तीक्ष्णाः कठोराश्च। तस्य नखेषु भक्तानां कृतेऽमृतम्, दुर्जनानां कृते विषञ्च युगपत् प्रकटितो भवति। कर्मानुसारं जीवनमरणं युगपदुपपन्नम्। भगवतो नृसिंहस्य तादृशा विलक्षणगुणयुता नखा कर्तृश्रोतृव्याख्यातृणां पीडापहारका, विघ्नविघातकाश्च भवेयुरिति विचिन्त्य ग्रन्थकारो मङ्गलं विदधाति।

*त्रिविधो ध्वनिः* मङ्गलप्रकारेष्वाशीर्वादात्मकेऽस्मिन् मङ्गलपद्ये भगवन्तं नृसिंहं प्रति ग्रन्थकारस्य भक्तिभावो व्यज्यते। तेन भावध्वनिना नमस्कारात्मकमपि सम्पद्यते। मङ्गलपद्ये नृसिंहावतारस्य स्तवनेन ग्रन्थे ध्वनेरवतारोऽपि गम्यते । नृसिंहस्तुतिरूपेण वस्तुना ध्वनिप्रस्थापनपरक**वस्तुव्यञ्जन**मित्यर्थः । तेन वस्तुना मङ्गलाचरणस्य वस्तुनिर्देशात्मकं स्वरूपमाविर्भवति । लोके नृसिंहस्य नखा इव काव्ये ध्वनिसिद्धान्ता इति सादृश्याद**उपमालङ्कारध्वनि**र्व्यज्यते। एवमेव स्वच्छेन स्वच्छतागुणेन नैर्मल्येन स्वच्छायया च वक्रहृद्यरूपया आकृत्या आयासितः खेदित इन्दुर्यैस्ते नखाः, अत्र अर्थशक्तिमूलेन ध्वनिना नखानां **बालचन्द्रत्वं** ध्वन्यते। आयासेन च नखानां सन्निधौ चन्द्रस्य विच्छायत्वमहृद्यत्वञ्च प्रतीयते, एतेन नखेषु स्वच्छत्वकुटिलाकारत्वयोगे नखचन्द्रयोस्तुल्येऽपि प्रपन्नार्तिहरत्वं चन्द्रस्यायासकारणं व्यज्यते। तस्मादत्र **व्यतिरेकालङ्कारो**ऽपि ध्वन्यते।

नित्योद्योगिनोऽसम्मोहाध्यवसाययोगित्वेनोत्साहप्रतीतेर्वीररसो ध्वन्यते । नृसिंहस्य उत्साहव्यञ्जकेन स्तवनेनापि **वीररसध्वनिः** परिस्फुरति ।

**काव्यप्रकाशः** नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।

नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥(मम्मटः, १९८३ : १)

**शब्दविवृतिः - नियतिकृतनियमरहिताम्**- नियत्या दैवेन कृता विहिता नियमा सुखदुःखात्मकास्तै रहिताम् । **ह्लादैकमयीम्**- ह्लादेन एकमयी एकमेव वस्तु प्रकृतं प्राचुर्येण प्रस्तुतं यस्यां सा एकमयी । **अनन्यपरतन्त्राम्**- परतन्त्राम् - परतन्त्रा पराधीना न भवतीति ताम् अनन्यपरतन्त्राम् । **नवरसरुचिराम्**- नव नवसङ्ख्यका रसा शृङ्गारादयो यस्यां सा नवरसाः, अथवा नवः प्रतिकाव्यं नवीना रसा यस्यामिति वा नवरसाः, नवरसाश्चासौ रुचिरा मनोहरा नवरसरुचिरा ताम् नवरसरुचिराम् ।

**नियतिकृतनियमरहिताम्** - सांसारिकी सृष्टिर्नियत्या दैवेन कृता ये नियमास्तै नियन्त्रिता भवति । कवेर्वाङ्निर्मितिस्तु तद्विलक्षणा । यथा- चन्द्रस्य नियतिकृतनियमस्तु तदाह्लादकत्वं शीतरश्मित्वञ्च परं कविस्तु तद्विपरीतं विरहोत्पीडितानां कृते चन्द्रस्य दाहकत्वगुणविशिष्टमुष्णरश्मित्वं वर्णयति । **ह्लादैकमयीम्** - तथा च विधेः सृष्टौ त्रिगुणात्मिका प्रकृतिः सत्वरजस्तमोमयी, अत एव सुखदुःखमोहस्वभावाः । काव्ये तु करुणभयानकयो रसयोरपि सर्वदाऽऽनन्दमात्रमेव सुरते दन्तक्षतनखक्षतादीनामिव । अतः कविसृष्टिः सदैव आह्लादैकमयी । कविसृष्टौ दुःखमोहादीनामभावाद् ब्रह्मणसृष्टेरुत्कृष्टतरा इत्यत्र व्यतिरेकालङ्कारो ध्वन्यते ।

**अनन्यपरतन्त्राम्**- ब्रह्मणसृष्टौ कार्यकर्तुः स्वातन्त्र्यं न भवति । यथा- दण्डचक्रचीवरादीनामभावे कुलालो घटनिर्मातुं न प्रभवेत् । अनेनैव प्रकारेण कस्यापि कार्यस्य कृते कर्ता परतन्त्रो भवति परं कविनिर्मितौ कविप्रतिभायाः परं न किञ्चिदपेक्ष्यते । अतः कवेः सृष्टिरनन्यपरतन्त्रा भवति ।

**नवरसरुचिराम्**- विधेः सृष्टौ षड्रसा एव प्रसिद्धाः । कविसंसारे शृङ्गाराद्या नवरसाः । विधिनिर्मिते लोके प्राणीनां कृते सर्वे षड्रसा हृद्या नानुभूयते । यथा- कट्वादयः । काव्ये तु सर्वे रसाः सर्वत्र हृद्या एव । करुणादावपि रसे जायते यत्परं सुखमिति । अतो नवरसरुचिरामिति ।

एतादृशीं विलक्षणस्वरूपां कविनिर्मितीमादधाती भारती कवेर्जयति । भारत्या निर्मितिभूतं काव्यं सर्वोत्कर्षेण वर्तते । जयत्यर्थेन वक्तुर्विषयस्य च वैशिष्ट्यान्नमस्कारो व्यज्यते मत्त त्वमुत्कृष्टः, त्वत्तोऽमनुत्कृष्टः इति नमस्कारार्थत्वात् । अतो जयत्यर्थेन नमस्कारलक्षणं **वस्तु** व्यज्यते । विधिनिर्मित्यपेक्षया भारतीनिर्मितौ गुणाधिक्यं व्यज्यते । तस्मादत्र **व्यतिरेकालङ्कारो** ध्वनिः । भारतीविषयकभावध्वनिश्च स्पष्ट एव, स च **रसादिलक्षणो**ऽलक्ष्यक्रमध्वन्यन्तर्गतः । इत्यस्मिन् पद्ये स्पष्टतया त्रिविधो ध्वनिः प्रतीयते ।

**साहित्यदर्पणः** शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।

अपहृत्य तमः सन्ततमर्थान्निखिलान् प्रकाशयतु ॥ (विश्वनाथः ,१९९५ : १)

शरदः इन्दुः शरदिन्दुः, तस्य सुन्दरी- मनोहरा रुचिः - ज्योत्स्ना इव सुन्दरी रुचिर्यस्या सा, शरदिन्दुसुन्दररुचि गिरां देवी, मम चेतसि सन्ततं निबिडतया व्याप्तम्, तमोऽज्ञानरूपमन्धकारम् अपहृत्य- दूरीकृत्य अखिलान् वाच्यलक्ष्यव्यङ्ग्यात्मकान्नर्थान् प्रकाशयतु - प्रकटीकरोतु इति मङ्गलपद्यार्थः । चन्द्रमसा सह वाग्देव्याः सादृश्यकल्पनादत्रोपमालङ्कारः ।

अत्र शरदिति पदेन चन्द्रमसो निरावृतत्वमाह्लादकत्वञ्च बोध्यते । तद्वत् देव्यापि प्रसन्नत्वमाह्लादकत्वञ्च बोध्यम् । यथा शरदिन्दुर्निबिडान्धकारं विनश्य सर्वान्नपि भौतिकान् पदार्थान् प्रकाशयति तथैव वाग्देवी सरस्वती नितान्तमज्ञानमपहृत्य सर्वान्नेव वाच्यलक्ष्यव्यङ्ग्यादीनर्थान् बुद्धिविषयीकरोतु इति । तत्रापि चन्द्रो हि बाह्यान्धकारं दूरीकृत्य दर्शनक्षणपर्यन्तमेव भौतिकान् पदार्थान् प्रकाशयति परं वाग्देवी तु चेतसोऽज्ञानापहरणेन सदा वाच्यादीनर्थान् प्रकाशयतीति उपमानभूतस्य चन्द्रस्यापेक्षया उपमेयभूताया वाग्देव्या आधिक्यवर्णनादत्र व्यतिरेकालङ्कारो ध्वनिर्व्यज्यते ।

**कुवलयानन्दः** अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥ (दीक्षितः, १९९७ : १)

अमरीणां देवस्त्रीणां कबरीभारेषु केशपाशेषु सौगन्ध्यलोभात् संसृष्टा या भ्रमर्यः ताभिर्मुखरीकृतं गौर्याः चरणमेव पङ्कजमिति (मयूरव्यंसकादित्वात्समासः) ग्रन्थकर्तुः पाठकानाञ्च दुरितं पापं विघ्नं वा दूरीकरोतु विनाशयतु ।

अत्र चरणमेव पङ्कजमित्यत्र मयुरव्यंसकादिसमासाश्रयणात्परिणामालङ्कारः । चरणे आरोप्यमाणस्य पङ्कजस्यारोपविषयचरणात्मतापरिणतिं विना दुरितदूरीकरणक्रियार्थत्वासम्भवात्। न च पङ्कजमिव चरणमिति पूर्वपदार्थप्रधान उपमितसमास एवास्त्विति शङ्क्यम् । अमरीणां कबरीभारस्य केशपाशस्य सम्बन्धिनी सौगन्ध्यलोभात् तत्संसृष्टा या भ्रमरी तया मुखरीकृतमिति विशेषणस्यानुगुण्याभावात् तस्य पङ्कजगतत्वेनैव प्रसिद्धेरिति। एतद्विशेषणावगतेन च पादपतनेनाभिव्यज्यमाना गौरीविषयिणी सुराङ्गनागता रतिः कविगता तां पुष्णातीतित्यत्र भावध्वनिरपि बोध्यः ।

**रसगङ्गाधरः** रसगङ्गाधरप्रणेता जगन्नाथः नूतनग्रन्थमारभमाणस्तत्समाप्तिप्रतिबन्ध- कान्तरायसन्ततिशान्तये मङ्गलमाचरन् शिष्यान् विशिष्य शिक्षयितुं निबध्नाति यत्-

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीय मतिचुम्बिनी भवतु कापि कादम्बिनी ॥ (जगन्नाथः, १९९७ : १)

मङ्गलपद्येऽस्मिन् घनश्यामस्य श्रीकृष्णस्य मङ्गलमय्या मूर्तेर्वर्णनमस्ति । या कृष्णमूर्तिः स्मृतिमात्रविषयीभूताऽपि मानवानां त्रिविधतापान् करुणार्द्रया दयया हरति, या मूर्तिः अभङ्गुरया तनुप्रभया युक्तया विद्युन्मालया वेष्टिताऽस्ति । या मूर्तिः कलिन्दकन्याया यमुनायास्तटोपवर्तिनो वृन्दावनस्य सुरतरुं कदम्बमाश्रयन्ती तिष्ठति । एतादृशा प्रसिद्धातिरिक्ता कादम्बिनी तत्त्वेनाध्यवसिता घनश्याममूर्तिर्मदीयमतेश्चुम्बिनी सान्निध्यशीला भवतु ।

प्रकृतिसौन्दर्यरूपा कादम्बिनी (मेघमाला) अचेतनत्वात् केवलं नयनानन्दं सूर्यातपात् शीतत्वञ्चाविष्करोति परं कादम्बिनि लक्षिता कृष्णमूर्तिस्तु त्रिविधतापादिशमनविलक्षणा अस्ति । तस्मादत्र व्यतिरेकालङ्कारः । एवमेव सन्तापः कृष्णमूर्तिप्रभृतयो ये उपमेया सन्ति तेषां क्रमेण आतप-विद्युत्-कादम्बिनीप्रभृतिभिरूपोपमानैर्निगरणत्वात् अतिशयोक्त्यलङ्कारोऽपि विलसति ।

***नमस्कारात्मकम्***

स्वापकर्षबोधानुकूलस्वीयव्यापारविशेषो नमस्कारः। (पञ्चानन १७८ : ७८) मङ्गलाचरणस्य भेदेऽस्मिन् देवादीनां गुणगौरववर्णनात्मिकी स्तुतिः वर्ण्यते । नमनयोग्या गुरुमुनिदेवादीनां प्रति स्वकीयं न्यूनत्वं बोधनाय नमस्क्रियमाणस्य पुरुषस्य शरीरमनोवाणिभिः कृतो व्यापारविशेषो नमस्कारः कथ्यते । एतादृशं विनम्रभावव्यञ्जितं मङ्गलाचरणं नमस्कारात्मकं कथ्यते । संस्कृतग्रन्थप्रणयनपरम्परायां नमस्कारात्मकानि मङ्गलाचरणानि बहूनि लभ्यन्ते । तेष्वत्र दिङ्मात्रमुदाहृयते **मुक्तावल्यां** यथा-

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥ (पञ्चानन १९७८ : ३)

नूतनश्चासौ जलधरो मेघो नूतनजलधरः नूतनजलधरस्य रुचिरिव रुचिर्यस्य स नूतनजलधररुचिः तस्मै नूतनजलधररुचये । गां पान्तीति गोपाः गोपानां वधूट्यः तासां गोपवधूटीनां दुकूलानि गोपवधूटीदुकूलानि चोरयति यः स चौरः गोपवधूटीदुकूलचौरः तस्मै गोपवधूटीदुकूलचौराय । संसारः जन्मस्थितिलयशीलो जगतः स एव महीरुहो वृक्षः तस्य बीजाय निमित्तकारणाय तस्मै कृष्णाय नमः । अत्र भगवतः श्रीकृष्णस्य गुणगौरवं संस्मृत्य कृता नमस्कारात्मिकी भावाभिव्यक्तिर्विद्यते । तस्मात्पद्यमिदं नमस्कारात्मकमङ्गलाचरणस्य निदर्शनम् ।

**उत्तररामचरितम् :** उत्तररामचरितनाटकादौ कविर्भवभूतिः सम्भावितविघ्नविनाशाय व्यासवाल्मीक्यादिभ्यः पूर्वेभ्यो कविभ्यो नमस्कारोच्चारणपूर्वकं वाग्देव्याः आशीर्वादापेक्षापूर्वकं मङ्गलमाचरति यत्-

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥ (भवभूतिः, १९२५ : ५)

पूर्वेभ्यः - व्यासवाल्मीकिभ्यो कविभ्योः, इदं नमोवाकम्- नमस्कारोच्चारणपूर्वकम्, आत्मनः - परमात्मनः, अमृताम्- नित्याम्, देवतां वाचम्- देवरूपिणीं वाणीं सरस्वतीम्, विन्देम- आप्नुयामः । एतत् (वयम्) प्रशास्महे- प्रार्थयामहे । अत्र नमस्कारपूर्वकमाशीर्वादनिवेदनमपि व्यज्यते । एवञ्च वाग्देवीविषयिणी रतिः परिस्फुरति ।

**रघुवंशम् :** वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ (कालिदासः, १९५६ : २)

अहं ग्रन्थकर्ता वाक् च अर्थश्च वागर्थौ तयोः सम्यग्ज्ञानार्थं वागर्थाविव सम्पृक्तौ नित्यसंयुक्तौ जगतः संसारस्य माता च पिता च पितरौ मातापितरूपौ पार्वतीपरमेश्वरौ उमामहेश्वरौ वन्दे नमस्करोमि । प्रसन्नौ उमामहेश्वरौ माम् आशीर्वादरूपेण काव्यरचनाशक्तिं प्रदीयेतामिति । वागर्थाविव इत्यत्रोपमालङ्कारो विद्यते । अत्र कवेः शिवपार्वतीविषयिणी रतिश्च व्यज्यते ।

**कादम्बरी :** रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमः स्पृशे ।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ॥(वाणभट्टः, १९७६ : १)

जनानां जन्मनि रजोगुणयुताय (ब्रह्मरूपिणे), स्थितौ - स्थितिकाले सत्त्ववृत्तये (विष्णुरूपिणे), सत्त्वगुणयुक्ताय प्रलये संहारकाले तमः स्पृशे - तमोगुणयुताय (महेश्वररूपिणे), अत एव सर्गस्थितिनाशहेतवे - सृष्टिस्थितिसंहारकारणाय त्रयीमयाय - ब्रह्माविष्णुमहेश्वररूपाय यद्वा वेदस्वरूपाय, त्रिगुणात्मने रजसत्वतमोगुणस्वरूपाय स्वयं तु अजाय - जन्मरहिताय, तादृशाय परब्रह्मपरमेश्वराय नमो नमस्कारोऽस्तु । त्रयीमय इत्यत्र श्लेषालङ्कारः ।

## *वस्तुनिर्देशात्मकम्*

ग्रन्थप्रतिपाद्यवस्तुनो निर्देशनम् वस्तुनिर्देशात्मकम् । (पञ्चानन १७८ : ७९)

ग्रन्थारम्भे ग्रन्थस्य प्रतिपाद्यविषयवस्तुनः सङ्केतो यत्र विधीयते । तत् वस्तुनिर्देशात्मकं मङ्गलाचरणं कथ्यते । एतादृशानि मङ्गलाचरणानि बहूनि प्राप्यन्ते ।

**कुमारसम्भवम् :** कालिदासः कुमारसम्भवं काव्यं चिकीर्षुः 'आशीर्नमस्क्रिया वस्तुनिर्देश वापि तन्मुख'मिति शास्त्रात्काव्यादौ वक्षमाणार्थानुगुणं वस्तु निर्दिशति-

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥ (कालिदासः, १९३५ : ५)

उत्तरस्यां दिशि देवतात्माधिष्ठता यस्य इत्यनेन वक्ष्यमाणमेनकापरिणयपार्वती- जननादिचेतनकार्यरूपः वस्तुसङ्केतो भवति । अस्ति इत्यत्र 'अ' विष्णुवाचकोऽस्ति, 'अकारो विष्णुरुद्दिष्टः' इति । 'अस्ति' इत्यपि ईश्वरीयसत्तावाचकोऽस्ति । अतोऽत्र प्रारम्भिकेन अक्षरेण भगवतः संस्मरणान्वितं शिवपार्वत्यौ चरित्राश्लिष्टं हिमालयस्य वर्णनं क्रियते इति वस्तुनिर्देशो लभ्यते ।

**मेघदूतम्** : एवमेव कविकुलगुरुकालिदासो ग्रन्थादौ वस्तुनिर्देशात्मकमङ्गलाचरणं कुर्वन् स्वकर्तव्यासावधानहेतोः स्वस्वामिशापयुक्तस्य कस्यचिद् यक्षस्य भूलोकस्थितवासस्थानं वर्णयति-

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥(कालिदासः, १९९७ : १)

मेघदूतस्य मङ्गलाचरणमिदम् । अत्र काव्ये वर्णनीयस्य शापेन मर्त्यलोके कान्ताविरहव्यथितस्य यक्षस्यावस्थितिर्वर्णनं विद्यते । तस्मादिदं वर्णनीयवस्तुसङ्केतितत्वात् वस्तुनिर्देशनात्मकं मङ्गलाचरणमस्ति। एवमेवात्र श्लोकारम्भे 'कः' वर्णः समागतोऽस्ति । स च देववाचकोऽस्ति । अनेन कवि देवस्मरणपूर्वकं मङ्गलाचरणं करोतीति कविकुलगुरोरिष्टदेवं प्रति नमस्कारोऽपि व्यज्यते ।

**शिशुपालवधम् :** श्रियः पति श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥ (भवभूतिः, १९८५ : १)

हरिर्मुनिं ददर्श इति पद्यवाक्यमूलम् । कोऽसौ हरिरित्यत्र श्रियः पतिः लक्ष्मीनाथो हरिरिति अनेन रुक्मिणीरूपया श्रिया समेत इति सूचितम् । कीदृशो हरिः जगन्निवासो जगतामाधारभूतः, तथापि जगत् लोकं शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियन्तुम्, श्रीरस्त्यस्मिन्निति श्रीमत् तस्मिन् श्रीमति लक्ष्मीयुते वसुदेवसद्मनि वसुदेवरूपिणः कश्यपस्य गृहे वसन् तिष्ठन् हरिः, कं मुनिं हिरण्यगर्भाङ्गभुवं हिरण्यस्य गर्भो हिरण्यगर्भो ब्रह्मा ब्रह्माण्डप्रभवत्वात् । तस्याङ्गादवयवादुत्सङ्गाद्भवतीति हिरण्यगर्भाङ्गभूः (उत्सङ्गाद् नारदो जज्ञे दक्षोऽङ्गुष्ठात् स्वयंभुवः इति पुराणवाक्यात्) तं हिरण्यगर्भाङ्गभुवं मुनिं ब्रह्मतनयं नारदमित्यर्थः। अम्बरादाकाशादवतरन्तमायान्तं इन्द्रसन्देशकथनार्थमित्यर्थः । ददर्श अवलोकयामास ।

अत्र अल्पियसि वसुदेवसद्मनि सकलजगदाधारभूतस्य हरेराधेयत्वकथनाद- धिकोऽलङ्कारः । जगद्व्यापकस्य जगदेकनिवासित्वमिति विरोधश्चापि ।

**नैषधीयचरितम् :** नैषधाख्यं महाकाव्यं चिकीर्षुः कवि श्रीहर्षः चिकीर्षितार्थनिर्विघ्नपरिसमाप्तिहेतोः आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् कथानायकस्य राज्ञो नलस्य इतिवृत्तरूपं मङ्गलं वस्तु निर्दिशति यथा-

निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्सुधामपि ।
नलस्सितच्छत्रितकीर्तिमण्डलस्स राशिरासीन्महसां महोज्ज्वलः॥(श्रीहर्षः,१९९७ : १)

यस्य क्षितिरक्षिणो भूमिपालस्य नलस्य कथामाख्यानम् निपीय बुधा- विद्वांसः सुराश्च सुधान्नपि न तथा आद्रियन्ते । सुधामतिरिच्य गुणाधायकत्वात् नलकथां प्रति समुन्मुखा भवन्ति, सुधामपेक्ष्य बहु मन्यन्ते । सितछत्रित्वं सितातपत्रीकृतं कीर्तिमण्डलं येन स महसां तेजसां राशिः रविरिवेति भावः । महैरुत्सवैरुज्ज्वलः दीप्यमानो नित्यमहोत्सवशालीत्यर्थः स नल आसीत् ।

अत्र नाटकस्य नायके नले महशां राशिरित्यस्य एवमेव कीर्तिमण्डले सितच्छत्त्रत्वरूपस्यारोपाद् रूपकम् । सुधापेक्षया कथायारुत्कर्षवर्णनाद् व्यतिरेकश्च । अस्मिन् मङ्गलपद्ये वक्ष्यमाणस्य महाकाव्यस्य नायकमुद्दिश्य तस्य गुणकीर्तनवर्णनं विद्यते । अतः महाकाव्यस्य वस्तुसङ्केतितत्वादिदं वस्तुनिर्देशात्मकं मङ्गलाचरणं मन्यते।

ग्रन्थारम्भे ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरेदिति शास्त्रप्रसिद्धिर्विद्यते, तथापि प्रायशो ग्रन्थस्य प्रारम्भ एव मङ्गलाचरणपद्यमुपस्थापितं दृश्यते । अस्माकं पौरस्त्यसंस्कारबद्धानां मनसि मान्यजनानां प्रति असामान्या श्रद्धा भक्तिश्च भवति । तेषामाशीर्वादलाभेन विघ्नादिकार्यावरोधका दूरीभवन्तीति अस्मासु दृढो विश्वासो विद्यते । एवमेव तेषा संस्मरणेन ससावधाना निश्चिन्ताश्च वयं प्रकृतकार्ये संलग्ना भवामः । एताभ्यामाध्यात्मिकभौतिककारणाभ्यां निरवरोधेन ग्नन्थकर्तुः ग्नन्थसमाप्तिर्जायते इति मङ्गलाचरणकार्यस्य प्राथमिकं महत्त्वं ज्ञायते । तथा च निर्मितस्य ग्रन्थस्याध्येतारो भावको ग्रन्थपठनकाले प्रारम्भे गुरुमुनिदेवादिगुणगौरववर्णितं पद्यं पठति । एतेन मनसि प्रातर्स्मरणीयेषु तेषु जातया श्रद्धया स ससावधानेन एकाग्रेण विधिना ग्रन्थाध्ययनं कृत्वा पूर्णरूपेण तस्य प्रयोजनफलमासादयति । एतादृशैर्नैकैर्महत्त्वाधायकैरुदाहरणैर्ग्रन्थनिर्विघ्नतया परिसमाप्तये तस्याध्ययनविधिना प्रयोजनसिद्धये च मङ्गलाचरणमावश्यकमिति संलक्ष्यते ।

## निष्कर्षः

मानवमनसि यदा सकारात्मिका भावना सञ्जायते तदा एव फलदायीनि कार्याणि सम्पद्यते। विकृतिरियं मानवमनः सामाजिकैर्गर्हणीयं कार्यमेवाविष्करोति । तस्मात् प्रयोजनान्वितं कार्यं सम्पादनार्थं मानवमनः पवित्रं निर्मलञ्च भवितुमर्हति । तस्य कृते कस्यापि कार्यस्यारम्भे मनसः परिष्कार आवश्यको भवति । सत्कार्यकारिणांमान्यजनानां स्मरणेनास्माकं मनः स्वच्छतामधिगच्छति । एतादृशीं व्यवहारिकीमवस्थां विचार्यैव प्राचीनैः कार्यारम्भे मङ्गलव्यवहारः करणीयः इति समुद्घोषितम् । अधुना प्रायशः सर्वेषु कार्येषु प्रारम्भे मङ्गलव्यवहारः क्रियते । ग्रन्थनिर्माणमपि जगतः कल्याणाय एव भवति । तस्मादत्रापि प्रारम्भे मङ्गलव्यवहारस्य परम्परा विद्यते । ग्रन्थनिर्माणे एकाग्रभावः प्राकृतिकं वातावरणञ्चावश्यकं भवति । तत्र ग्रन्थकर्तुर्मनोऽपि निर्मलमपेक्षते । प्रारम्भे गुरुमुनिदेवादिगुणगौरवस्मरणेन ग्रन्थकर्तुर्मनो निर्मलं भवति । सांसारिकान् भोगविलासादीन् परित्यज्य देवादीनां स्मरणेन स्वच्छीभूता मानसिकी अवस्था प्राक्कल्पनानुसारं ग्रन्थनिर्माणं निर्वघ्नतया सञ्जायते । ग्रन्थसमाप्तौ प्रारम्भे स्मृतानां मान्यजनानामाशीर्वादश्च सहकारिकारणत्वेन भवत्येव । एतादृशं दृश्यमदृश्यञ्च महत्त्वं मङ्गलाचरणस्य दृश्यन्ते । भौतिकवादीनां कृते मनसो निर्मलीकरणम्, आध्यात्मिकानां कृते आशीर्वादलाभेन विघ्नशमनञ्च मङ्गलाचरणस्य प्रयोजनं दरीदृश्यते । मङ्गलाचरणसम्बद्धग्रन्थस्याध्ययने संलग्नाः पाठका अपि प्रारम्भे देवादीनां मङ्गलपठनेन ग्रन्थाध्ययने सावधाना भवन्ति । अतः ते सारल्येन ग्रन्थरसमनुभवन्ति । तस्मात् सर्वेषां कृते कार्यारम्भे मङ्गलाचरणमावश्यकं महत्त्वाधायकञ्च मन्यते ।

## सन्दर्भसामग्रीसूची


आनन्दवर्धनः, (२०४२), *ध्वन्यालोकः*, चौखम्बा विद्याभवन।

उप्रेती स्थानेश्वरः, (ई.१९०७), *ध्वन्यालोक एक अध्ययन*, परिमल प्रकाशन।

कालिदासः,(२०११), *अभिज्ञानशाकुन्तलम्*, चौखम्बा कृष्णदास अकादमी।

-------( ई.१९३५), *कुमारसम्भवम्*, पाण्डुरङ्ग जावजी।

------ (ई.१९९७), *मेघदूतम्* (तृ सं), भारतीय विद्या प्रकाशन।

------ (ई.१९५६), *रघुवंशम्*, चौखम्बा संस्कृत सीरिज आफिस।

पतञ्जलिः (ई.१९९८), *महाभाष्यम्* , चौखम्बा विद्याभवन।

पञ्चानन विश्वनाथः, (ई.१९७८), *न्यायसिद्धान्तमुक्तावली*, चौखम्बा सुरभारती प्रकाशन।

बरालः, ईश्वरः, (२०५५), *नेपाली साहित्य कोशः*, नेपाल राजकीय प्रज्ञा प्रतिष्ठान।

भवभूतिः, (ई.१९२५), *उत्तररामचरितम्*, पाण्डुरङ्ग जावजी।

मम्मटः, (ई.१९८३), *काव्यप्रकाशः* (अ सं), साहित्य भण्डार।

माघः, (१९८५), *शिशुपालवधम्*, चौखम्बा संस्कृत सीरिज आफिस।

वाणभट्टः, (१९७६), *कादम्बरी*, मोतीलाल बनारसी दास।

विश्वनाथः, (१९७५), *साहित्यदर्पणः*, चौखम्बा सुरभारती प्रकाशन।

विश्वेश्वरः, (सम्पा.), (१९९८), *ध्वन्यालोकः*, व्याख्या ज्ञानमण्डल लिमिटेड।

शर्मा, सुबोधः, (सं २०१५), *लघुशब्देन्दुशेखरः*(पञ्चसन्ध्यन्तो भागः) मुक्तस्वाध्यायपीठम् (राष्ट्रियसंस्कृतसंस्थानम्)

श्रीहर्षः, (१९९७), *नैषधीयचरितम्*, मोतीलाल बनारसी दास।